Roll No. : ......................................

Total No. of Questions : **12** ] [ Total No. of Printed Pages : **4**

# SA–303

## B.A. (Part–III) Suppl. Examination, 2021

## SANSKRIT

Paper - I

**(काव्य, स्मृति एवं निबन्ध)**

*Time : 1½ Hours* ] [ *Maximum Marks :* ***100***

**खण्ड–अ** **(अंक : 2 × 10 = 20)**

**नोट** :– सभी **दस** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **50** शब्द)। प्रत्येक प्रश्न **2** अंक का है।

**खण्ड–ब** **(अंक : 8 × 5 = 40)**

**नोट** :– सात में से किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **200** शब्द)। प्रत्येक प्रश्न **8** अंक का है।

**खण्ड–स** **(अंक : 20 × 2 = 40)**

**नोट** :– चार में से किन्हीं **दो** प्रश्नों के उत्तर दीजिए (उत्तर-सीमा **500** शब्द)। प्रत्येक प्रश्न **20** अंक का है।

**खण्ड–अ**

**नोट** :– सर्वे प्रश्नाः करणीयाः। अधस्तनेषु केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि (उत्तर-सीमा **50** शब्देषु) संस्कृतभाषया देयानि।

1. (i) देवतात्मा हिमालयो नाम नगाधिराजः कस्यां दिशि राजते ?

   (ii) उमामुखं प्रतिपद्य तु द्विसंश्रयां प्रीतिं का अवाप ?

(iii) मैनाकः कस्य पुत्रः आसीत् ?

(iv) किरातार्जुनीय-महाकाव्यस्य प्रथमे सर्गे केषां पात्राणां संवादो मिलति ? तेषां नामानि लिखत।

(v) 'प्रवृत्तिसाराः खलु मादृशां गिरः' इति कथनं कस्य वर्तते ?

(vi) केन साकं विरोधिता दुरन्ता भवति ?

(vii) अनन्तवर्मा इत्यस्य पितुः नाम किम् ?

(viii) एकदा एकान्ते वसुरक्षितो नाम मन्त्रिवृद्धः कम् उपदिशति ?

(ix) याज्ञवल्क्यस्मृतौ कति अध्यायाः सन्ति ? तेषां नामानि लिखत।

(x) धर्मशास्त्रं कस्माद् बलवद् भवति ?

**खण्ड–ब**

**नोट** :– अधस्तनेषु केषाञ्चित् **पञ्च**प्रश्नानां उत्तराणि (उत्तर-सीमा **200** शब्देषु) विधेयानि।

2. अधोलिखितस्य श्लोकस्य प्रसङ्गं दत्वा अनुवादं करोतु–

(क) अस्त्युत्तरस्यां दिशि देवतात्मा

हिमालयो नाम नगाधिराजः।

पूर्वापरौ तोयनिधिवगाह्य

स्थितः पृथिव्याः इव मानदण्डः॥

**अथवा**

(ख) अवचितबलिपुष्पा वेदिसम्मार्गदक्षा

नियमविधिजलानां बर्हिषा चोपनेत्री।

गिरिशमुपचचार प्रत्यहं सा सुकेशी

नियमितपरिखेदा तच्छिरश्चन्द्रपादैः॥

3. अधोलिखितस्य श्लोकस्य प्रसङ्गानुकूला व्याख्या विधेया—

(क) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः।

सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः॥

**अथवा**

(ख) विहाय शान्तिं नृपधामतत्पुनः प्रसीद सन्धेहि वधाय विद्विषाम्।

व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः॥

4. अधोलिखितस्य कस्याप्येकस्य गद्यांशस्य प्रसङ्गानुकूलः अनुवादः करणीयः—

(क) बुद्धिशून्यो हि भूभदत्युच्छ्रितोऽपि परैरध्यारुह्यमाणमात्मानं न चेतयते। न च शक्तः साध्यं साधनं वा विभज्य वर्तितुम्, यथावृत्तश्च कर्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते। न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय।

(ख) अथ नालीजङ्घं रहस्यशिक्षयम्—तात! आर्यमार्यकेतुमेकान्ते ब्रूहि—'को न्वेष मायापुरुषो य इमां राज्यलक्ष्मीमनुभवति। स चायमस्मद्वालो भुजङ्गेनामुना परिगृहीतः। किमुद्गीर्येत ग्रस्येत वा' इति।

5. अधोलिखितस्य पद्यस्यस्य प्रसङ्गाभिमता व्याख्या कार्या—

(क) अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः।

उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः॥

**अथवा**

(ख) अपुत्रा योषितश्चैषा भर्तव्या साधुवृत्तयः।

निर्वास्या व्यभिचारिण्यः प्रतिकूलास्तथैव च॥

6. महाकवि-भारवेः स्थितिकालादिकम् अधिकृत्य परिचयो देयः।

7. कुमारसम्भवस्य प्रथमसर्गानुसारं हिमालयसौन्दर्यं स्वशब्दैः वर्णयत।

8. दशकुमारचरितस्य सामान्यः परिचयो देयः।

## खण्ड–स

**नोट** :– कयोश्चिद् **द्वयोः** प्रश्नयोः सुविस्तृतम् उत्तरं (उत्तर-सीमा **500** शब्देषु) दीयताम्।

9. 'उपमा कालिदासस्य' इति समुचितैरुदाहरणैः प्रमाणीक्रियताम्।

10. किरातार्जुनीयस्य प्रथमसर्गानुगतं द्रौपद्याः चरित्र-चित्रणं क्रियताम्।

11. 'दण्डिनः पदलालित्यम्' इति समुचितैरुदाहरणैः स्पष्टीक्रियताम्।

12. **एक**स्मिन् विषये निबन्धो लेख्यः–

    (क) वर्तमानकाले संस्कृत-भाषायाः महत्त्वम्

    (ख) परोपकारः